# Kundalinistava from Rudrayamala uttaratantra

# કુણ્ડલિનીસ્તવઃ રુદ્રયામલોત્તરતન્ત્રાન્તર્ગતમ્

## Document Information

Text title : kuNDalinIstavaH rudrayAmalottaratantrArgatam

File name : kuNDalinIstava.itx

Category : devii, ShaTchakrashakti, stotra, devI

Location : doc_devii

Transliterated by : DPD

Proofread by : DPD

Description-comments : RudrayAmala uttaratantra paTalaH 6

Latest update : March 29, 2013

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 22, 2022

*sanskritdocuments.org*

# કુણ્ડલિનીસ્તવઃ રુદ્રયામલોત્તરતન્ત્રાન્તર્ગતમ્

કુણ્ડલિનીસ્તુતિસ્તોત્રઃ

જન્મોદ્ધારનિરીક્ષણીહતરુણી વેદાદિબીજાદિમા
નિત્યં ચેતસિ ભાવ્યતે ભુવિ કદા સદ્વાક્યસઞ્ચારિણી ।
માં પાતુ પ્રિયદાસભાવકપદં સંન્ધાતયે શ્રીધરા
ધાત્રિ ત્વં સ્વયમાદિદેવવનિતા દીનાતિદીનં પશુમ્ ॥ ૬-૨૯॥

રક્તાભામૃતચન્દ્રિકા લિપિમયી સર્પાકૃતિર્નિદ્રિતા
જાગ્રત્કૂર્મસમાશ્રિતા ભગવતિ ત્વં માં સમાલોકય ।
માંસોદ્ગન્ધકુગન્ધદોષજડિતં વેદાદિકાર્યાન્વિતં
સ્વલ્પાન્યામલચન્દ્રકોટિકિરણૈર્નિત્યં શરીરં કુરુ ॥ ૬-૩૦॥

સિદ્ધાર્થી નિજદોષવિત્ સ્થલગતિર્વ્યાજીયતે વિદ્યયા
કુણ્ડલ્યાકુલમાર્ગમુક્તનગરી માયાકુમાર્ગૈઃ શ્રિયા ।
યદ્યેવં ભજતિ પ્રભાતસમયે મધ્યાહ્નકાલેઽથવા
નિત્યં યઃ કુલકુણ્ડલીજપપદામ્ભોજં સ સિદ્ધો ભવેત્ ॥ ૬-૩૧॥

વાય્વાકાશચતુર્દલેઽતિવિમલે વાઞ્છાફલાન્યાલકે
નિત્યં સમ્પ્રતિ નિત્યદેહઘટિતા શાઙ્કેતિતાભાવિતા ।
વિદ્યાકુણ્ડલમાલિની સ્વજનની માયાક્રિયા ભાવ્યતે
યૈસ્તૈઃ સિદ્ધકુલોદ્ભવૈઃ પ્રણતિભિઃ સત્સ્તોત્રકૈઃ શંભુભિઃ ॥ ૬-૩૨॥

ધાતાશઙ્કર મોહિનીત્રિભુવનચ્છાયાપટોદ્ગામિની
સંસારાદિમહાસુખપ્રહરણી તત્રસ્થિતા યોગિની ।
સર્વગ્રન્થિવિભેદિની સ્વભુજગા સૂક્ષ્માતિસૂક્ષ્માપરા
બ્રહ્મજ્ઞાનવિનોદિની કુલકુટી વ્યાઘાતિની ભાવ્યતે ॥ ૬-૩૩॥

વન્દે શ્રીકુલકુણ્ડલીત્રિવલિભિઃ સાઙ્ગૈઃ સ્વયમ્ભૂં પ્રિયમ્
પ્રાવેષ્ટ્યામ્બરમાર્ગચિત્તચપલા બાલાબલાનિષ્કલા ।

યા દેવી પરિભાતિ વેદવચના સંભાવિની તાપિની
ઇષ્ટાનાં શિરસિ સ્વયમ્ભુવનિતાં સંભાવયામિ ક્રિયામ્ ॥ ૬-૩૪॥

વાણીકોટિમૃદઙ્ગનાદમદનાનિશ્રેણિકોટિધ્વનિઃ
પ્રાણેશીરસરાશિમૂલકમલોલ્લાસૈકપૂર્ણાનના ।
આષાઢોદ્ભવમેઘવાજનિયુતધ્વાન્તાનનાસ્થાયિની
માતા સા પરિપાતુ સૂક્ષ્મપથગે માં યોગિનાં શઙ્કરઃ ॥ ૬-૩૫॥

ત્વામાશ્રિત્ય નરા વ્રજન્તિ સહસા વૈકુણ્ઠકૈલાસયોઃ
આનન્દૈકવિલાસિનીં શશિશતાનન્દાનનાં કારણામ્ ।
માતઃ શ્રીકુલકુણ્ડલી પ્રિયકરે કાલીકુલોદ્દીપને
તત્સ્થાનં પ્રણમામિ ભદ્રવનિતે મામુદ્ધર ત્વં પશુમ્ ॥ ૬-૩૬॥

કુણ્ડલીશક્તિમાર્ગસ્થં સ્તોત્રાષ્ટકમહાફલમ્ ।
યતઃ પઠેત્ પ્રાતરુત્થાય સ યોગી ભવતિ ધ્રુવમ્ ॥ ૬-૩૭॥

ક્ષણાદેવ હિ પાઠેન કવિનાથો ભવેદિહ ।
પઠેત્ શ્રીકુણ્ડલો યોગો બ્રહ્મલીનો ભવેત્ મહાન્ ॥ ૬-૩૮॥

ઇતિ તે કથિતં નાથ કુણ્ડલીકોમલં સ્તવમ્ ।
એતત્સ્તોત્રપ્રસાદેન દેવેષુ ગુરુગીષ્પતિઃ ॥ ૬-૩૯॥

સર્વે દેવાઃ સિદ્ધિયુતાઃ અસ્યાઃ સ્તોત્રપ્રસાદતઃ ।
દ્વિપરાર્દ્ધં ચિરઞ્જીવી બ્રહ્મા સર્વસુરેશ્વરઃ ॥ ૬-૪૦॥

॥ ઇતિ રુદ્રયામલોત્તરતન્ત્રાન્તર્ગતે કુણ્ડલિનીસ્તવઃ સમ્પૂર્ણમ્ ॥

Encoded and proofread by DPD

*Kundalinistava from Rudrayamala uttaratantra*
pdf was typeset on January 22, 2022

Please send corrections to *sanskrit@cheerful.com*